# Shri Vyasaraja(tIrtha) Navaratna Padyamala

# શ્રીવ્યાસરાજનવરત્નપદ્યમાલા

## Document Information

Text title : Vyasaraja Tirtha Navaratna Padya Mala

File name : vyAsarAjanavaratnapadyamAlA.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Venkataramanacharya

Transliterated by : Mandar Mali aryavrutta at gmail.com

Proofread by : Mandar Mali aryavrutta at gmail.com

Description/comments : Vyasaraja Tirtha of 13th century AD

Latest update : September 20, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

Shri Vyasaraja(tIrtha) Navaratna Padyamala

# શ્રીવ્યાસરાજનવરત્નપદ્યમાલા

શ્રીનવવૃન્દાવનસ્થગુરુપરમ્પરાસ્તોત્રસહિતમ્

શ્રીવેદવ્યાસાય નમઃ ॥ હરિઃ ૐ ॥

ગોપાલકૃષ્ણો જયતિ સત્યારુક્મિણિસંયુતઃ ।
બ્રહ્મણ્યતીર્થસમ્ભૂતવ્યાસરાજવરપ્રદઃ ॥ ૧॥

કલ્યાણં વિતનોતુ કંસમથનો ગોપાલકૃષ્ણોઽનિશં
સત્યાપાણ્ડવપૂજિતો યદુપતિસ્સ વ્યાસતીર્થાગ્રતઃ ।
ભૈષ્મીસેવિતદક્ષિણાઙ્ઘ્રિકમલે વિન્યસ્ય વામં પદં
બાલસ્સુન્દરભઙ્ગિભાવમધુરો યો નૃત્યતિ સ્માદ્ભુતમ્ ॥ ૨॥

પાતુ બ્રહ્મણ્યતીર્થવ્રતિવરતિલકસ્તત્ત્વવિદ્યાપ્રદાતા
ધ્યાયન્ બ્રહ્મણ્યદેવં પ્રકટિતમહિમા ભૂસુરૈર્વન્દ્યપાદઃ ।
સર્વાભીષ્ટપ્રદાતા સકલભયહરઃ સર્વરોગાપહર્તા
ભાસ્વાન્સ્વાંશાવતીર્ણો મહિતમહિમભાક્ વ્યાસરાજસ્તુતોઽસ્માન્ ॥ ૩॥

કણ્વાપગાતટગુહોદિતગર્જિતેન
પ્રોદ્વેજિતા નિખિલવાદિગજા હિ યેન ।
વિદ્રાવિતાઃ સપદિ સઙ્કુરદુર્મતાન્ધાઃ
તં વ્યાસતીર્થમૃગરાજમિમં નમામિ ॥ ૪॥

શ્રીકૃષ્ણદેવપૃથિવીપતિના સ્વરાજ્ય
લક્ષ્મ્યાશ્રિતશ્ચ ગુરુવત્પ્રભુણા સુરાણામ્ ।
વિદ્યાધિરાટ્ વિજયવિઠ્ઠલભક્તિભાગ્ યઃ
સ વ્યાસરાટ્ દિશતુ શં સતતં પ્રસન્નઃ ॥ ૫॥

શ્રીવેઙ્કટેશપદપઙ્કજદિવ્યગન્ધ-
સંસેવનાત્સમુદિતપ્રતિભાપ્રભાય ।
બ્રહ્મણ્યતીર્થચરણામ્બુજબમ્ભરાય

શ્રીવ્યાસરાજગુરવેઽસ્તુ નમશ્શુભાય ॥ ૬॥

યોગીશ્વરાય સુખતીર્થકરાર્ચિતશ્રી
યોગાસનસ્થનૃહરેઃ સમુપાસકાય ।
શાન્તાય શશ્વદપરોક્ષિતશૌરયેઽસ્મૈ
શ્રીવ્યાસરાજગુરવેઽસ્તુ નમશ્શુભાય ॥ ૭॥

ગોપાલકૃષ્ણકૃતનર્તનરઞ્જિતાય ।
રાગાદિદોષરહિતાય દૃઢવ્રતાય ।
સ્વસ્થાપિતાન્ધ્રહનુમત્પરવેઙ્કટાર્ચ-
શ્રીવ્યાસરાજગુરવેઽસ્તુ નમશ્શુભાય ॥ ૮॥

શ્રીશપ્રસાદકરમાનસપૂજનાય
સજ્જ્ઞાનભક્તિસુવિરક્તિસુખપ્રદાય ।
પ્રહ્લાદકાય ભજતાં હિ સુરદ્રુમાય
શ્રીવ્યાસરાજગુરવેઽસ્તુ નમશ્શુભાય ॥ ૯॥

શ્રીમત્સમીરસમયાબ્ધિસુધાકરાય
મિથ્યાકુશાસ્ત્રતમસો હિ વિભાકરાય ।
વ્યાસત્રયામૃતદુહે ભુવિ દેવતાભ્યઃ
શ્રીવ્યાસરાજગુરવેઽસ્તુ નમશ્શુભાય ॥ ૧૦॥

અક્ષાદિસિદ્ધજગતોઽસ્ય યથોર્ણનાભિ-
જન્માદિમોક્ષદહરેઃ પરમપ્રિયાય ।
શ્રીમજ્જયીન્દ્રપદવીપરિવર્ધકાય
શ્રીવ્યાસરાજગુરવેઽસ્તુ નમશ્શુભાય ॥ ૧૧॥

ક્ષેત્રેઽબ્બુરૌ હ્યુપગુહં પુરુષોત્તમાખ્યે
બ્રહ્મણ્યતીર્થગુરુભિર્દ્વિકવિઠ્ઠલાદ્યૈઃ ।
વેદાન્તરાજ્યનિજરાજ્યપદેઽભિષિક્ત
રાજાધિરાજગુરવેસ્તુ નમો નમસ્તે ॥ ૧૨॥

વૈય્યાઘ્રપાદપુરમધ્યસુશોભમાન
શ્રીવ્યાસરાજહૃદયાબ્જસુમધ્યવર્તી ।
લક્ષ્મીનિવાસગુરુણા પ્રણુતસ્સલક્ષ્મી-
નારાયણશ્ચ હનુમાન્ મુદિતોઽસ્તુ કૃષ્ણઃ ॥ ૧૩॥

શ્રીવ્યાસરાજમુનિગાયનતૃપ્તચેતા
    નૃત્યન્સુરેન્દ્રસુતપૂજિતપાદપદ્મઃ ।
કુન્દાપુરીયમઠભિક્ષુવરાર્ચ્યમાન
    ભૈષ્મીસમેતમુરલીધરમાધવોઽવ્યાત્ ॥ ૧૪॥

શ્રીમદ્બ્રહ્મણ્યતીર્થવ્રતિવરતિલકાલબ્ધજન્માપરોક્ષ્યઃ
    લક્ષ્મીનારાયણાર્યાન્નિજગુરુચરણાત્પ્રાપ્તવિદ્યાધિલક્ષ્મીઃ ।
સોઽયં શ્રીવ્યાસરાજો વિજયસખહરિ પૂજયન્ભાવપુષ્પૈઃ
    અગ્રે વૃન્દાવનેઽસ્મિન્ સુખયતિ સુજનાન્ સર્વદાઽભીષ્ટવૃષ્ટ્યા ॥ ૧૫॥

બ્રહ્મણ્યાર્યસ્તતોઽભૂન્નરહરિમનિશં પૂજયન્કણ્વનદ્યાં
    સ્નાયન્શિષ્યાહૃતાન્નં યુદજગમુદકં પ્રોક્ષ્ય તપ્તં વિધાય ।
સ્નાત્વા ભુક્ત્વા પુનશ્ચ ક્વચિદુપગતવાન્ ભૂસ્થિતાં વિઠ્ઠલાર્ચા
    શિષ્યેભ્યો મધ્વશાસ્ત્રં હ્યનિશમુપજગૌ વિઠ્ઠલપ્રીતિમિચ્છન્ ॥ ૧૬॥

અર્થિકલ્પિતકલ્પોઽયં પ્રત્યર્થિકરિકેસરી ।
વ્યાસતીર્થગુરુભૂયાદસ્મદિષ્ટાર્થસિદ્ધયે ॥ શ્રીઃ ॥

પદ વાક્યપ્રમાણજ્ઞાન્ સંપ્રદાયાર્થકોવિદાન્ ।
વ્યાસતીર્થમુનીન્વન્દે દુર્વાદિફાણિપક્ષિપાન્ ।

ઇતિ શ્રીવેઙ્કટરમણાચાર્યવિરચિતં
શ્રીવ્યાસરાજકોમલકરકમલાર્ચિતશ્રીરુક્મિણી-
સત્યભામાસમેતશ્રીવેણુગોપાલકૃષ્ણઃ પ્રીયતામ્ ॥

અથ શ્રીનવવૃન્દાવનસ્થગુરુપરમ્પરાસ્તોત્રમ્ ।
પ્રીતો વરદો ભવતુ । શ્રીકૃષ્ણાર્પણમસ્તુ ।
શ્રીશં મધ્વં પદ્મનાભં વાદિદ્વિપમૃગાધિપમ્ ।
કવીન્દ્ર કુમતારણ્યપાવાકં તત્ત્વદીપપકમ્ ॥ ૧॥

સમીરશાસ્ત્રવાગીશં વાગીશાખ્યં ગુરું પરમ્ ।
બ્રહ્મણ્યતીર્થસમ્ભૂતં જ્ઞાનવૈરાગ્યદાયકમ્ ।
જગદ્ગુરું વ્યાસરાજં વાદિરાજગુરું ભજે ॥ ૨॥

રઘુવર્યં સુધીન્દ્રં ચ શ્રીનિવાસં પરં ગુરુમ્ ।
દુર્વાદિફણિવિદ્વેષે ગુરુમન્તં તપોનિધિમ્ ॥ ૩॥

રામતીર્થગુરું વન્દે ગોવિન્દાખ્યં યતિં પુનઃ ।

તુઙ્ગભદ્રામધ્યગતં નવવૃન્દાવનસ્થિતમ્ ॥ ૪॥

રમણોપપદેનેયં વેઙ્કટેન કૃતા શુભા ।
વ્યાસરાજસ્તુતિર્ભૂયાત્પ્રીત્યૈ માધવમધ્વયોઃ ॥ ૫॥

ઇતિ શ્રીવેઙ્કટરમણાચાર્યવિરચિતં
શ્રીનવવૃન્દાવનસ્થગુરુપરમ્પરાસ્તોત્રં સમ્પૂર્ણમ્ ॥

॥ શ્રીકૃષ્ણાર્પણમસ્તુ ॥

॥ ઇતિ ॥

Encoded and proofread by Mandar Mali aryavrutta at gmail.com

---

*Shri Vyasaraja(tIrtha) Navaratna Padyamala*
pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*